॥ श्री यज्ञ नारायणो हरिर्ज्जयति ॥

VALLABHASAMPRADAYACHARYA
N.N.GOSWAMI G. MAHARAJ
GIRDHARIKUNJ
SOUTH YASHWANT GANJ
INDORE (M.P.)
INDIA

VALLABHASAMPRADAYACH-
H.H. GOSWAMI G MAHARA
GIRDHARIKUNJ
SOUTH YASHWANT GANJ
INDORE. (M.P.)
INDIA

॥ श्रीः ॥

चौखम्बा सुरभारती-ग्रन्थमाला

५

(न्यायविभागे प्रथमपुष्पम्)

श्रीमदन्नम्भट्टविरचितः

तर्कसंग्रहः

पदकृत्यटीकासहितो हिन्दीभाषाऽनुवादद्वितयोपेतश्च

व्याख्याकारः

आचार्यश्रीशेषराजशर्मा रेग्मी

भूतपूर्वप्राध्यापकः

काशीस्थ-हिन्दूविश्वविद्यालयस्य

नेपालस्थ-त्रिभुवनविश्वविद्यालयस्य च

प्रकाशकः—

चौखम्बा सुरभारती प्रकाशन

वाराणसी

प्रकाशक:—

चौखम्बा सुरभारती प्रकाशन

के. ३७/११७, गोपालमंदिर लेन,

वाराणसी–२२१००१

सर्वाधिकार सुरक्षित

प्रथम संस्करण १९७५

मूल्य २.५० रुपया

मुद्रक

ज्ञानमण्डल लि०

वाराणसी ।

श्रीः

अथाऽकारादिवर्णक्रमेण न्यायपदाऽर्थकोशः

अजहल्लक्षणा = लक्ष्यशक्योभयबोध-प्रयोजिका, यथा छत्रिणो भान्तीति ।

अतिव्याप्तिः = लक्ष्यवृत्तित्वे सति अलक्ष्यवृत्तित्वं, यथा—गोः शृङ्गित्वम् ।

अत्यन्ताऽभावः = त्रैकालिक-संसर्गाऽवाच्छिन्न-प्रतियोगिताकः यथा—

अधर्मः (गुणः) = वेदनिषिद्धकर्मजन्यगुणत्वम् । यथा—वायौ रूपाऽभावः । यथा सुरापानादिः ।

अनन्यथासिद्धत्वम् = अन्यथासिद्धिशून्यत्वम् ।

अनित्यत्वम् = ध्वंसप्रतियोगित्वम्, प्रागभावप्रतियोगित्वं वा । जो ध्वंस-का प्रतियोगी है, वह अनित्य है, जैसे घट ।

अनुपसंहारी = (सव्यभिचारहेत्वाभासभेदः) अन्वयव्यतिरेकदृष्टान्तरहितः, यथा सर्वम् अनित्यं, प्रमेयत्वात् ।

अनुभवः (बुद्धिभेदगुणः) = स्मृतिभिन्नं ज्ञानम् ।

अनुमानम् (**प्रमाणम्**) = अनुमितेः करणं, लिङ्गपरामर्शः ।

अनुमितिः (बुद्धि-भेदगुणः) = परामर्शजन्यं ज्ञानम्, 'पर्वतो वह्निमान्' इति ज्ञानम् ।

अन्यथासिद्धिः = अवश्यकल्पितनियतपूर्ववर्तिन एव कार्यसंभवे तत्सह-भूतत्वम् ।

अन्योन्याऽभावः (अभावभेदः) = तादात्म्यसम्बन्धाऽवच्छिन्नप्रतियोगि-ताकः, यथा घटः पटो न ।

अन्वयव्यतिरेकि = (लिङ्गविशेषः) अन्वयेन व्यतिरेकेण च व्याप्तिमत्, यथा—वह्नौ साध्ये धूमवत्त्वम् ।

अन्वयव्याप्तिः = तत्सत्त्वे तत्सत्त्वम् अन्वयः । यत्र धूमस्तत्राऽग्निर्यथा महा-नसम् इति अन्वयव्याप्तिः । साध्यसाधनयोः साहचर्यम् अन्वयः ।

अपक्षेपणम् (कर्मविशेषः) = अधोदेशसंयोगहेतुः ।

अपरत्वम् (गुणविशेषः) अपरव्यवहाराऽसाधारणकारणम्। तद् द्विविधम्। समीपस्थे दिक्कृतम् अपरत्वम्। कनिष्ठे कालकृतम् अपरत्वम्।

अपरसामान्यम् (जातिविशेषः) = न्यूनदेशवृत्तित्त्वम्।

अपानः = (वायुविशेषः) जलादेरधःप्रापको वायुः।

अभावः = प्रतियोगिज्ञानाऽधीनज्ञानविषयः।

अयथार्थस्मृतिः = अप्रमाजन्या स्मृतिः अयथार्था।

अयथार्थाऽनुभवः = (बुद्धिभेदः) तदभाववति तत्प्रकारकोऽनुभवोऽयथार्थः। यथा शुक्तौ रजतम् इति।

अयुतसिद्धौ = ययोर्द्वयोर्मध्ये एकमपराश्रितमेवाऽवतिष्टते तावयुतसिद्धौ। यथा—अवयवाऽवयविनौ, गुणगुणिनौ, क्रियाक्रियावन्तौ, जातिव्यक्ती, विशेषनित्यद्रव्ये चेति।

अवयवत्वं = प्रतिज्ञाद्यन्यतमत्वम्।

अव्याप्तिः (लक्षणदोषः) = लक्ष्यैकदेशाऽवृत्तित्वं; यथा गोः कपिलत्वम्।

असमवायिकारणम् = कार्येण कारणेन वा सहैकस्मिन्नर्थे समवेतत्वे सति कारणम्। यथा तन्तुसंयोगः पटस्य। तन्तुरूपं पटगतरूपस्य।

असंभवः (लक्षणदोषः) = लक्ष्यमात्राऽवृत्तित्वं, यथा गोः एकशक्वत्त्वम्।

असाधारणः (सव्यभिचारभेदः हेत्वाभासः) = सर्वसपक्षविपक्षव्यावृत्तः पक्षमात्रवृत्तिः, यथा—शब्दो नित्यः शब्दत्वात्।

असिद्धः (हेत्वाभासविशेषः) = आश्रयाऽसिद्ध-स्वरूपाऽसिद्ध—व्याप्यत्वाऽसिद्धान्यतमः।

आकरजम् (तेजसो विषयभेदः) यथा—आकरजं तेजः सुवर्णादि।

आकाङ्क्षा = (वाक्यार्थज्ञानहेतुविशेषः) पदस्य पदान्तरव्यतिरेकप्रयुक्ताऽन्वयाऽननुभावकत्वम्।

आकाशम् (द्रव्यभेदः) = शब्दगुणकम्। (तच्चैकं विभु नित्यं च)।

आकुञ्चनम् (कर्मविशेषः) = शरीरसंनिकृष्टसंयोगहेतुः।

आत्मा = (द्रव्यविशेषः) ज्ञानाऽधिकरणमात्मा। स द्विविधः परमात्मा जीवात्मा चेति।

आपः (द्रव्यविशेषः) = शीतस्पर्शवत्यः। (ता द्विविधाः नित्या अनित्याश्च०)।

आप्तः = यथार्थवक्ता (यथाभूताऽवाधिताऽर्थोपदेष्टा)।

आश्रयाऽसिद्धत्वम् (हेत्वाभासविशेषः) = पक्षताऽवच्छेदकाऽभाववत्पक्षकत्वम्। यथा—गगनाऽरविन्दं सुरभि, अरविन्दत्वात्सरोजाऽरविन्दवत्०।

इच्छा (गुणविशेषः) = इच्छात्वजातिमती। तस्याः पर्यायः कामः।

इन्द्रियाऽर्थसन्निकर्षः=प्रत्यक्षज्ञानहेतुः, स षड्विधः। पुनर्द्विविधो लौकिकोऽलौकिकश्च।

ईश्वरः (आत्मभेदद्रव्यम्) = समवायसम्बन्धेन नित्यज्ञानवान्।

उत्क्षेपणम् (कर्मभेदः) = ऊर्ध्वदेशसंयोगहेतुः।

उदर्यम् (तेजसो विषयभेदः) = भुक्तस्य परिणामहेतुः उदर्यं तेजः।

उदानः (वायुद्रव्यभेदः) अन्नादेरूर्ध्वनयनहेतुर्वायुः। 'उदानः कण्ठदेशस्थः।'

उदाहरणम् = (पराऽर्थाऽनुमानस्य एकोऽवयवः) व्याप्तिप्रतिपादकदृष्टान्तवचनम्। यथा—यो यो धूमवान्स सोऽग्निमान् इति।

उदीची (दिशाभेदः) = पुरुषस्य सुमेरुसन्निहिता दिक्।

उद्देशः = नाममात्रेण वस्तुसंकीर्तनम्।

उपनयः = (पराऽर्थाऽनुमानस्य एकोऽवयवः) उदाहृतव्याप्तिविशिष्टत्वेन हेतोः पक्षधर्मताप्रतिपादकं वचनम्। यथा—तथा चाऽयम् इति।

उपमानम् (प्रमाणविशेषः) उपमितिकरणम् (सादृश्यज्ञानम्), यथा अयं (गौः) गवयपदवाच्य इति। अस्य त्रयो भेदाः। सादृश्यविशिष्टपिण्डज्ञानम्, असाधारणधर्मविशिष्टपिण्डज्ञानम्, वैधर्म्यविशिष्टपि राऽज्ञानं च।

उपमितिः (यथाऽर्थाऽनुभवभेदः) = संज्ञासंज्ञिसम्बन्धज्ञानम्। संज्ञा=पदं, संज्ञी = अर्थः, तयोः सम्बन्धः शक्तिः।

उपाधिः (हेतुदोषः) = साध्यव्यापकत्वे सति साधनाऽव्यापकत्वम्। अस्य त्रयो भेदाः—केवलसाध्यव्यापकः पक्षधर्मावच्छिन्नसाध्यव्यापकः साधनावच्छिन्नसाध्यव्यापकश्चेति।

करणम् (कारणविशेषः) = व्यापारवत् असाधारणं कारणम्।

कर्म (पदार्थविशेषः) = चलनात्मकं कर्म। संयोगभिन्नत्वे संयोगाऽसमवायिकारणम्, अस्य पञ्च भेदाः।

कारणम् = अन्यथासिद्धिशून्यत्वे सति कार्यनियतपूर्ववृत्ति। अस्य त्रयो भेदाः। समवायिकारणम्, असमवायिकारणं निमित्तकारणं च।

कार्यम् = प्रागभावप्रतियोगि। (यस्याऽभावः स प्रतियोगी)।

कालः (द्रव्यविशेषः) = अतीतादिव्यवहाराऽसाधारणहेतुः। अस्य त्रयो भेदाः।

केवलव्यतिरेकि (लिङ्गविशेषः) = अन्वयव्याप्तिशून्यत्वे सति व्यतिरेकव्याप्तिमत्त्वम्। यथा पृथिवीतरेभ्यो भिद्यते गन्धवत्त्वात्, यदितरेभ्यो भिद्यते न तद्गन्धवत्, यथा जलम्, न चेयं तथा, तस्मान्न तथेति।

केवलाऽन्वयि (लिङ्गविशेषः) = अन्वयमात्रव्याप्तिकम्। यथा—घटोऽभिधेयः प्रमेयत्वात् पटवत्०।

गन्धः (गुणविशेषः)=घ्राणग्राह्यो गुणः। स द्विविधः—सुरभिरसुरभिश्च। पृथिवीमात्रवृत्तिः।

गुरुत्वम् (गुणविशेषः) = आद्यपतनाऽसमवायिकारणम्। पृथिवीजलवृत्ति।

घ्राणम् (इन्द्रियविशेषः) = पृथिव्या इन्द्रियं गन्धग्राहकं नासाऽग्रवर्ति।

चक्षुः (इन्द्रियविशेषः) = तेजस इन्द्रियं, रूपग्राहकं, कृष्णताराऽग्रवर्ति।

जहल्लक्षणा = वाच्याऽर्थस्याऽन्वयाऽभावः, यथा गङ्गायां घोषः।

जीवः (आत्मविशेषः) = सुखादिसमवायिकारणम्। प्रति शरीरं भिन्नो विभुर्नित्यश्च।

जीवनयोनिः (प्रयत्नविशेषः, गुणभेदः) = जीवनाऽदृष्टजन्यो गुणः। स च प्राणसंचारकारणम्।

तर्कः (अयथार्थाऽनुभवभेदः) = व्याप्यारोपेण व्यापकारोपः। यथा—"यदि वह्निर्न स्यात्तर्हि धूमोऽपि न स्यात्' इति।

तेजः (पदार्थविशेषः) = उष्णस्पर्शवत्। तद्द्विविधं नित्यमनित्यं च।

त्वक् (वायोरिन्द्रियम्) = स्पर्शग्राहकम्, सर्वशरीरवृत्ति।

दक्षिणा (दिग्विशेषः) = मेरोर्व्यवहिता दिक्।

दिक् (द्रव्यविशेषः) = प्राच्यादिव्यवहाराऽसाधारण हेतुः। सा चैका नित्या विभ्वी च।

दिव्यम् (तेजोविषयभेदः) = अबिन्धनं, दिद्युदादि।

दुःखम् (गुणविशेषः) = सर्वेषां प्रतिकूलतया वेदनीयम्।

द्रवत्वम् (गुणविशेषः) = स्यन्दनाऽसमवायिकारणं, पृथिव्यप्तेजोवृत्ति ।

द्रव्यम् (पदार्थऽविशेषः) = द्रव्यत्वजातिमत्त्वं गुणवत्त्वं समवायिकारणत्वं वा द्रव्यत्वम् ।

द्वेषः (गुणविशेषः) = क्रोधः, द्वेष्टीत्यनुभवसिद्धद्वेषत्वजातिमान्, द्विष्टसाधनताज्ञानजन्यगुणो वा ।

धर्मः (गुणविशेषः) = वेदविहितकर्मजन्यः । (धर्माऽधर्मौ अदृष्टपदवाच्यौ, वासनाजन्यौ च) ।

निगमनम् (पराऽर्थाऽनुमानाऽवयवः) = पक्षे साध्यस्याऽबाधितत्वप्रतिपादकवचनम् । यथा—'तस्मात्तथे'ति ।

नित्यत्वम् = ध्वंसभिन्नत्वे सति ध्वंसाऽप्रतियोगित्वम् ।

निमित्तकारणम् = समवाय्यसमवायिभिन्नं कारणं, यथा तुरीवेमादिकं पटस्य ।

निर्विकल्पकम् (प्रत्यक्षविशेषः) = निष्प्रकारकं ज्ञानम् ।

निवृत्तिः (प्रयत्नविशेषः) = द्वेषजन्यो गुणः ।

न्यायत्वम् = प्रतिज्ञादिपञ्चकसमुदायत्वम् ।

पक्षः = सन्दिग्धसाध्यवान्, यथा धूमवत्त्वे हेतौ पर्वतः ।

पक्षधर्मता = व्याप्यस्य पर्वतादिवृत्तित्वम् । (व्याप्यस्य = व्याप्त्याश्रयस्य धूमादेरित्यर्थः) ।

पदम् = शक्तम्, निरूपकतासम्बन्धेन शक्तिविशिष्टमित्यर्थः ।

पदाऽर्थत्वं = द्रव्याद्यन्यतमत्वव्याप्यम् ।

परत्वम् (गुणविशेषः) = परव्यवहाराऽसाधारणं कारणम् । दूरस्थे दिक्कृतं परत्वम् । ज्येष्ठे कालकृतं परत्वम् ।

परसामान्यम् = अधिकदेशवृत्ति । परं = सत्ता ।

परामर्शः = विषयितासम्बन्धेन व्याप्तिविशिष्टपक्षधर्मज्ञानम् । यथा वह्निव्याप्यधूमवानयं पर्वत इति ज्ञानम् ।

पराऽर्थाऽनुमानम् (प्रमाणविशेषः) = यत्तु स्वयं धूमादग्निमनुमाय परप्रत्ययार्थं पञ्चाऽवयववाक्यं प्रयुज्यते तत् ।

परिमाणम् (गुणविशेषः) = मानव्यवहाराऽसाधारणकारणम् । नवद्रव्यवृत्ति । तच्चतुर्विधम—अणु, महद्दीर्घं ह्रस्वं चेति ।

पाकः = विजातीयतेजःसंयोगः ।

पृथक्त्वम् (गुणविशेषः) = पृथग्व्यवहाराऽसाधारणकारणम् । सर्वद्रव्यवृत्ति ।

पृथिवी (द्रव्यविशेषः) = गन्धसमवायिकारणम् । सा द्विविधा नित्याऽनित्या च ।

प्रतिज्ञा (परार्थाऽनुमानाऽवयवः) = साध्यविशिष्टपक्षबोधकवचनम् । यथा—पर्वतो वह्निमानिति ।

प्रतियोगी = यस्याऽभावः सः, यथा घटाऽभावस्य प्रतियोगी घटः ।

प्रतीची (दिग्विशेषः) = अस्ताऽचलसंयुक्ता दिक् ।

प्रत्यक्षम् = प्रत्यक्षज्ञानकरणम् । इन्द्रियाऽर्थसन्निकर्षजन्यं ज्ञानम् । तद्द्विविधं—निर्विकल्पकं सविकल्पकं चेति ।

प्रध्वंसः (अभावपदार्थविशेषः) = साऽऽदिरनन्तः प्रध्वंसः, उत्पत्त्यनन्तरं कार्यस्य ।

प्रयत्नः (गुणविशेषः) = प्रयत्नत्वजातिमान् । स त्रिविधः प्रवृत्तिनिवृत्तिजीवनयोनिभेदात् ।

प्रवृत्तिः (प्रयत्नगुणविशेषः) = इच्छाजन्यो गुणः ।

प्रसारणम् (कर्मविशेषः) = विप्रकृष्टसंयोगहेतुः ।

प्रागभावः (अभावपदार्थविशेषः) = अनादिः साऽन्तः, उत्पत्तेः पूर्वं कार्यस्य ।

प्राची (दिग्विशेषः) = उदयाऽचलसंयुक्ता दिक् ।

प्राणः (वायुविशेषः) = शरीराऽन्तःसञ्चारी वायुः, स चैकोऽप्युपाधिभेदात् प्राणाऽपानादिसंज्ञां लभते ।

बाधितः (हेत्वाभासविशेषः) = यस्य साध्याऽभावः प्रमाणेन निश्चितः सः, यथा बह्निरनुष्णो द्रव्यत्वादित्यत्राऽनुष्णत्वं साध्यं सदभाव उष्णत्वं स्पर्शेन प्रत्यक्षेण गृह्यत इति बाधितत्वम् ।

बालः = अत्र (न्याये) अधीतव्याकरणकाव्यकोशोऽनधीतन्यायशास्त्रः ।

बुद्धिः (गुण विशेषः) = सर्वव्यवहारहेतुर्ज्ञानं, सा द्विविधा स्मृतिरनुभवश्च ।

भावना (संस्कारगुणविशेषः) = सामान्यगुणात्मकविशेषगुणोभयवृत्तिगुणत्वव्याप्यजातिमान् संस्कारः, स त्रिधा वेगो भावना स्थितिस्थापकश्चेति ।

भोगः = सुखदुःखाऽन्यतरसाक्षात्कारः ।

भौमम् (तेजोविषयविशेषः) = भौमं वह्न्यादिकम् । आदिपदेन खद्योतगततेजःप्रभृतिपरिग्रहः ।

मनः (द्रव्यविशेषः) = सुखाद्युपलब्धिसाधनमिन्द्रियम् । तच्च प्रत्यात्मनियतत्वादनन्तं परमाणुरूपं नित्यं च । (मूर्तद्रव्यम्) ।

मूर्तत्वम् = क्रियाश्रयत्वम् । मूर्तद्रव्याणि पृथिव्यप्तेजो वायुमनांसि ।

मोक्षः = आत्यन्तिकैकविंशतिदुःखध्वंसः ।

यथार्थस्मृतिः (बुद्धिभेदः) = प्रमाजन्या स्मृतिः ।

यथार्थाऽनुभवः (बुद्धिभेदः) = तद्वति तत्प्रकारकोऽनुभवः । तद्विशेष्यकतत्प्रकारकोऽनुभवः । यथा रजत इदं रजतमिति

योग्यता (वाक्यार्थज्ञाने हेतुविशेषः) = अर्थाऽबाधः । वह्निना सिञ्चेत् इति न प्रमाणं, योग्यताविरहात् ।

रसः (गुणविशेषः) = रसनग्राह्यो गुणः, स च षड्विधः, पृथिवीजलवृत्तिः ।

रसनम् (इन्द्रियविशेषः)=(अपाम्) इन्द्रियं रसग्राहकं, तच्च जिह्वाग्रवर्ति ।

रूपम् (गुणविशेषः) = चक्षुर्मात्रग्राह्यो गुणः, तच्च सप्तविधं, पृथिव्यप्तेजोवृत्ति ।

लक्षणम् = अव्याप्त्यतिव्याप्त्य संभव रूपदोषत्रयशून्यम्असाधारण, धर्मो वा ।

लक्षणा = शक्यसम्बन्धः, सा च त्रिधा जहदजहज्जहदजहद्भेदात् ।

लिङ्गम् (हेतुः) = व्याप्तिबलेन यद्यस्य गमकं तत्तस्य लिङ्गम् । तच्च त्रिविधम् ।

वाक्यम् = पदसमूहः, यथा गामानयेति । तच्च द्विधा वैदिकं लौकिकं चेति ।

वायुः (द्रव्यविशेषः) रूपरहितस्पर्शवान् । स द्विविधो नित्योऽनित्यश्च ।

विपक्षः = निश्चितसाध्याऽभाववान् । यथा धूमवत्वे हेतौ ह्रदः ।

विपर्ययः (अयथार्थाऽनुभवभेदः) मिथ्याज्ञानं, यथा 'शुक्तौ रजतम्' इति ।

विभागः (गुणविशेषः) = संयोगनाशको गुणः । नवद्रव्यवृत्तिः ।

विभुत्वम् = सर्वमूर्तद्रव्यसंयोगित्वम् । विभवश्चत्वार आकाशः कालो दिक् आत्मा चेति ।

विरुद्धः (हेत्वाभासविशेषः) = साध्याऽभावव्याप्तो हेतुः, यथा शब्दो नित्यः कृतकत्वात् इति । कृतकत्वं हि नित्यत्वाऽभावेनाऽनित्यत्वेन व्याप्तम् ।

विशेषाः (पदार्थविशेषाः) = आत्मत्वमनस्त्वभिन्नत्वे सति नित्यद्रव्यवृत्तयो व्यावर्तकाः ।

विषयः = शरीरेन्द्रियभिन्नत्वे सति उपभोगसाधनं, यथा पृथिव्या विषयो मृत्पाषाणादिः ।

वृत्तिः = शक्तिलक्षणाऽन्यतररूपा ।

वेगः (संस्कारगुणभेदः) = द्वितीयादिपतनाऽसमवायिकारणं, स च पृथिव्यादिचतुष्टयमनोवृत्तिः ।

व्यतिरेकव्याप्तिः (व्याप्तिविशेषः) = साध्याऽभावव्यापकीभूताऽभावप्रतियोगित्वम् । साध्यसाधनाऽभावयोः साहचर्यं व्यतिरेकः ।

व्यानः (वायुद्रव्यभेदः) = नाडीमुखेषु वितननशीलः, 'व्यानः सर्वशरीरगः' ।

व्यापारः = द्रव्याऽन्यत्वे सति तज्जन्यत्वे सति तज्जन्यजनकः ।

व्याप्तिः = साहचर्यनियमः, यत्र यत्र धूमस्तत्र तत्र वह्निरिति ।

न्यायपदार्थकोशः

व्याप्यत्वाऽसिद्धः (हेत्वाभासविशेषः) = सोपाधिको हेतुः । यथा "पर्वतो धूमवान् वह्निमत्त्वात्" इत्यत्र आर्द्रेन्धन संयोग उपाधिः ।

शक्तम् = निरूपकतासम्बन्धेन शक्तिविशिष्टत्वम् । शक्तं पदम् ।

शक्तिः = अस्मात्पदादयमर्थो बोद्धव्य इतीश्वरसंकेतः । अर्थस्मृत्यनुकूलपदपदार्थसम्बन्धः ।

शक्यत्वम् = विषयतासम्बन्धेन शक्त्याश्रयत्वं, यथा गवादेरर्थस्य गोपदशक्यत्वम् ।

शब्दः (गुणः) = श्रोत्रग्राह्यो गुणः आकाशमात्रवृत्तिः, स द्विविधः ।

शब्दः (प्रमाणविशेषः) = आप्तवाक्यम् । आप्तस्तु यथार्थवक्ता । वाक्याऽर्थज्ञानकरणम् ।

शब्दज्ञानं = वाक्यार्थज्ञानं, तत्करणं शब्दः ।

शरीरम् = भोगायतनं चेष्टाऽऽश्रयो वा ।

संशयः (अयथार्थाऽनुभवभेदः) = एकस्मिन्धर्मिणि विरुद्धनानाधर्मविशिष्टज्ञानं, यथा स्थाणुर्वा पुरुषो वा ।

संस्कारः (गुणविशेषः) = सामान्यगुणात्मविशेषगुणोभयवृत्तिगुणत्वव्याप्य-जातिमान् ।

संख्या (गुणविशेषः) = एकत्वादिव्यवहारहेतुर्गुणः, नवद्रव्यवृत्तिः। एकत्वादि-परार्धपर्यन्ता ।

सत्प्रतिपक्षः (हेत्वाभासभेदः) = साध्याऽभावसाधकं हेत्वन्तरं यस्य (हेतोः) सः । यथा—शब्दो नित्यः श्रावणत्वाच्छब्दत्ववत् । शब्दोऽनित्यः कार्यत्वाद्घटवत् , अयमेय "प्रकरणसम" इत्युच्यते ।

सन्निधिः (वाक्यार्थज्ञानहेतुविशेषः) = पदानामविलम्बेनोच्चारणम् ।

सपक्षः = निश्चितसाध्यवान् । यथा (धूमवत्त्वे हेतौ) महानसम् ।

समवायः = (पदार्थविशेषः) = नित्यसम्बन्धः, अयुतसिद्धवृत्तिः ।

समवायिकारणम् = यत्समवेतं कार्यमुत्पद्यते तत् । यथा तन्तवः पटस्य, पटश्च स्वगतरूपादेः ।

समानः (वायुविशेषः) = भुक्तपरिणामाय जठराऽनलस्य समुन्नायकः ।

समूहालम्बनं = नानाधर्मप्रकारताशालि एकं ज्ञानम् ।

सविकल्पकम् (प्रत्यक्षज्ञानभेदः) = सप्रकारकं ज्ञानं, यथा डित्थोऽयं, ब्राह्मणोऽयं, श्यामोऽयम् ।

सव्यभिचारः (हेत्वाभासविशेषः) = साधारणाऽसाधारणाऽनुपसंहार्यन्यतमः। अयमनैकान्तिकोऽप्युच्यते ।

संयोगः (गुणविशेषः) = संयुक्तव्यवहारहेतुर्गुणः, नवद्रव्यवृत्तिः ।

साधनाऽव्यापकत्वम्=साधनवन्निष्ठाऽत्यन्ताऽभावप्रतियोगित्वम् । यत्र वह्निस्तत्रार्द्रेन्धनसंयोगो नाऽस्ति, अयोगोलके आर्द्रेन्धनाऽभावात् ।

साधारणः (सव्यभिचारहेत्वाभासभेदः) = साध्याऽभावबद्वृत्तिः । यथा पर्वतोऽग्निमान् प्रमेयत्वात् इति । प्रमेयत्वस्य वह्न्यभाववति ह्रदे विद्यमानत्वात् ।

साध्यव्यापकत्वं = साध्यसमानाऽधिकरणाऽत्यन्ताऽभावाऽप्रतियोगित्वम् । 'यत्र धूमस्तत्रार्द्रेन्धनसंयोग इति साध्यव्यापकता ।

सामान्यं (जातिपदार्थः) = नित्यमेकमनेकाऽनुगतम् । द्रक्ष्यगुणकर्मवृत्ति। परं सत्ता । अपरं द्रव्यत्वादि ।

सुखं (गुणविशेषः) सर्वेषामनुकूलवेदनीयम् । "अहं सुखी" त्यनुभव-सिद्धसुखत्वजातिमद्धर्मात्राऽसाधारणकारणगुणो वा ।

स्थितिस्थापकः (संस्कारगुण भेदः) = अन्यथाकृतस्य पुनस्तदवस्थापादकः । कटादिपृथिवीवृत्तिः ।

स्नेहः (गुण विशेषः) = चूर्णादिपिण्डीभावहेतुर्गुणः । जलमात्रवृत्तिः ।

स्पर्शः (गुण विशेषः) = त्वगिन्द्रियमात्रग्राह्यो गुणः । स त्रिविधः ।

स्मृतिः (बुद्धिभेदः) = संस्कारमात्रजन्यं ज्ञानम् ।

स्वरूपाऽसिद्धः (असिद्ध हेत्वाभासभेदः) = पक्षे हेत्वभावः । "शब्दो गुणश्चाक्षुषत्वात् रूपवत्' अत्र चाक्षुषत्वं शब्दे नाऽस्ति, शब्दस्य श्रावणत्वात् ।

स्वार्थाऽनुमानं = स्वाऽनुमितिहेतुः ।

हेतुः (लिङ्गम्) = पञ्चम्यन्तं तृतीयाऽन्तं वा लिङ्गवचनम् ।

हेत्वाभासत्वम् (असद्धेतुत्वम्) = अनुमितित्करणाऽन्यतरप्रतिबन्धकयथार्थ-ज्ञानविषयत्वम् । सव्यभिचाराऽविरुद्धसत्प्रतिपक्षाऽसिद्धबाधिताः पञ्च हेत्वाभासाः ।

॥ इति ॥